## संस्कृतम् । (३/१५५१)

तेन इति[1] तृतीयासमर्थात् संस्कृतम् इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । सत उत्कर्षाधानं संस्कारः । दध्ना संस्कृतम् दाधिकम् । शार्ङ्गवेरिकम् । [2]मारीचिकम् । योगविभाग उत्तरार्थः ॥

## कुलत्थकोपधादण् । (४/१५५२)

कुलत्थ[3]शब्दात् ककारोपधात् शब्दाच्च प्रातिपदिकाद् अण् प्रत्ययो भवति संस्कृतम् इत्येतस्मिन् [4]विषये । ठकोऽपवादः । कुलत्थैः संस्कृतम् कौलत्थम् । ककारोपधात् – [5]तैत्तिडीकम् । [6]दार्दभकम् ॥

## तरति । (५/१५५३)

तेन [7]इति तृतीयासमर्थात् तरति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । तरति [8]प्लवते इत्यर्थः । काण्डप्लवेन तरति काण्डप्लविकः । [9]औडुपिकः ॥

## गोपुच्छाट् ठञ् । (६/१५५४)

[10]गोपुच्छशब्दाट् ठञ् प्रत्ययो भवति तरति इत्येतस्मि[11]न्नर्थे । ठकोऽपवादः । स्वरे विशेषः । [12]गौपुच्छिकः ॥

## नौद्व्यचष्ठन् । (७/१५५५)

नौशब्दाद् द्व्यचश्च प्रातिपदिकाट् ठन् प्रत्ययो भवति तरति इत्येतस्मिन् [13]अर्थे । ठकोऽपवादः । नावा तरति नाविकः[14] । द्व्यचः खल्वपि – [15]घटिकः । प्लविकः । [16]बाहुकः । षकारः सांहितिको नानुबन्धः । बाहुका स्त्री ।

[17]आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च ।
[18]आवसथात् किशरादेः षितः षडेते ठगधिकारे ॥

[19]विधिवाक्यापेक्षं च षट्त्वं, प्रत्ययास्तु सप्त (मा. भा. २.३२९) ॥

## चरति । (८/१५५६)

तेन [20]इति तृतीयासमर्थाच् चरति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । चरतिर्भक्षणे गतौ च (धा.पा. ५५९) वर्तते । दध्ना चरति दाधिकः[21] । [22]हास्तिकः । शाकटिकः ॥

---

1. इत्येव फ. 2. मारीचिकम् नास्ति फ. ह, मारिचिकम् ब. 3. शब्दात् नास्ति फ. ड. 4. अर्थे फ. ह. 5. तैत्तिणीकम् फ, तैस्तिकम् ह. 6. नास्ति फ, दार्दरुकम् ड, दारुष्कम् ह. 7. इत्येव ड. ह. 8. प्लवने ब. 9. औकप्लविकः ह, शारप्लविकः इत्यधिकम् ब. ड. ह. 10. पुच्छशब्दात् क. 11. विषये क. 12. गोपुच्छेन तरति इत्यधिकम् फ. ह. 13. विषये ब. 14. भवति इत्यधिकम् फ. 15. घटेन तरति इति इत्यधिकम् ह. 16. बाहुभ्यां तरति इति इत्यधिकम् ह, नास्ति फ, पतिकः इत्यधिकम् ड. 17. आकर्षपर्पादिभ्यः क. 18. आवसथ्यात् क. 19. विधिव्याख्यापेक्षया फ. 20. इत्येव फ. 21. शार्ङ्गवेरिकः इत्यधिकम् ड. ह, भुङ्क्ते इत्यर्थः इत्यधिकम् ड. 22. हस्तिना चरति इत्यधिकम् ह, औष्ट्रिकः इत्यधिकम् फ.